अच् ईत० । भगवतोऽष्टमावतारे २ऋषभदेवे च । “अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः । दर्शयन् वर्त्म धीराणां सर्व्वेषामात्मनाकृतम्” भा० १स्क० ३अ० ऋषभशब्दे विवृति र्दृश्या ।

**उरुगाय** पु० उरुभिः अनेकैर्गीयते गम्यते वा गै–गाने गाङ् गतौ वा कर्मणि घञ् । परमेश्वरे वासुदेवे “त्वीगय्के उरुगाय ! विक्रमे” ऋ० ८,२९,७, “उरुभिर्बहुभिर्गातव्यः बहुषु देशेषु गन्ता बहुकीर्त्तिर्वा” भा० बहुकीर्त्तिरिति पक्षे गीयते गायः कीर्त्तिरित्यर्थः “अत्राह तदुरुगायस्य विष्णोः” यजु० ६,३, “विष्ण उरुगायैषः” यजु० ८,१, यः पार्थिवानि त्रिभिरिद्वि गामभिरुरु क्रमिष्टोरुगायाय जीवसे” ऋ० १,१५५,४, “उरुगायाय उरुगातव्याय” भा० । गाङ् गतौ भावे घञ् गायो गतिः कर्म० । २विस्तीर्णायां गतौ “स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा” कठवल्ली । “उरुगाय विस्तीर्णां गतिम्” शा० भा० “असम्बाधानुरगायवतोऽभिध्यायत” छा० उ० उरुगायवतोविस्तीर्ण गतीन्” गै गाने घञ् कर्म० । ३बहुकीर्त्तने । “प्राणस्य वातायोरुगायं कुरुते” शत० ब्रा०,१,२,१४,

**उरुचक्षस्** त्रि० उरु यथा स्यात् तथा चष्टे चक्ष–असुन् । १महादर्शने “वर्षिष्ठक्षत्रा उरुचक्षसा नराः” ऋ० ८, १०१,२, सर्व्वद्रष्टृत्वात् २सूर्य्ये पु० “नमोभिरुरुचक्षो नृन्विस्वान्” ६,५१,९, शं नः सूर्य्य उरुचक्षा उदेतु” ७,३५,८,

**उरुज्मन्** त्रि० उर्व्वी ज्मा क्षितिर्यत्र । बहुभूमियुक्ते “उरुष्या, णा उरुज्मन्नप्रयुच्छन्” अथ० ६,४,२,

**उरुज्रयस्** त्रि० ज्रि–अभिभवे करणे असुन् उरु ज्रयोवेगोऽस्य विस्तीर्ण वेगे । वेगेन हि सर्व्वाभिभवात् ज्रयसस्तथात्वम् । “उरुज्रयसमिन्दुभिः” ऋ० ८,६,२७, “उरुज्रयसम् विस्तीर्णवेगम्” भा० । “उरुज्रयसं घृतयोनिमाहुतम्” ५,८,६, सेहानः पूतना उरु ज्रयः” ८,२६,१, इत्यत्र ज्रयसोवेगार्थकस्यासुन्नन्ततया प्रयोगात् तस्यादन्तकल्पनं प्रमादिकम् ।

**उरुज्रि** त्रि० उरु यथा तथा ज्रयति ज्रि क्विप् वेदे नि० न तुक् । ज्रू–वा० क्विं वा । प्रभूतगतियुक्ते । “अर्व्वाक्पथ उरुज्रयः कृणुध्वम्” ऋ० ७,३९,२, “उरुज्रय प्रभूतगमनाः” भा० ।

**उरुण्ड** पु० उपद्रावके असुरभेदे । “खलजाः शकधूमजा उरुण्डा ये च मट्मटाः । कुम्भमुष्का अयाशवः । तानस्या ब्रह्मणस्पते प्रतिबोधेन नाशय” अथ० ८,६,१५,

**उरुबिल** त्रि० उरु वृहत् बिलमस्य । वृहच्छिद्रयुक्ते पात्रे स्थाल्यां स्त्री गौरा० ङीष् । “यद्येषोखा भिद्येत याऽभिन्ना नवा स्थाल्युरुबिली स्यात्तस्यामिमं पर्य्यावपेत्” शत० ब्रा० १,६, ४,८,

**उरुज** पु० उरुभ्योऽद्भ्यो जायते जनयति अन्तर्भूतण्यर्थे जन–ड पृषो० अल्लोपः । प्रभूतपयोजनके । “गवामुरुजमभ्यर्षति व्रजम्” ऋ० ९,७७,४, “उरुजं प्रभूतानामपां जनकम्” भा०

**उररी** अव्य० उरु राति रा–बा० की । १अङ्गीकारे २विस्तारे च ।

**उरुलोक** न० उरु यथा तथा लोक्यते लोक–कर्म्मणि घञ् । १अन्तरिक्षे तस्य सर्व्वलोकेभ्यो महत्त्वेन ज्ञानात् तथात्वम् । “कालखात्मदिशां सर्व्वगतत्वं परमं महत्” भाषोक्तेस्तस्य परममहत्त्वम् । “ममान्तरिक्षमुरुलोकमस्तु” ऋ० १०,१२८,२ । कर्म्म० । २श्रेष्ठलोके पु० ।

**उरुवु** पु० उरु वायति वै शोषणे कु । एरण्डवृक्षे “शम्पाकोरुवुवर्षाभूवाजिगन्धानिशाच्छदैः” सुश्रु० स्वार्थे कन् तत्रैव । रायमुकुटस्तु उरुवुकस्थाने उरुवकइत्यङ्गीचकार पृषो० साधु ।

**उरुवूक** पु० उरु वायति वै शोषणे “उलूकादयश्च” उणा० नि० । रक्तैरण्डे “पुनर्नवावारुणतर्कार्य्युरुवूकवत्सादनीविल्वशाकप्रभृतीनि उष्णानि स्वादुतिक्तानि वातप्रशमनानि च” सुश्रु० । “पटोलवार्त्ताकुकारवेल्लकटुकिकाकेवुकोरुवूकपर्पटककिरातत्तिक्तकर्कोटकारिष्टकोषातकीवेतकरीराटरूषार्कपुष्पप्रभृतीनि रक्तपित्तहराण्याहुर्हृद्यानि सुलघूनि कुष्ठमेहज्वरश्वासकासारुचिहराणि च” सुश्रुत: ।

**उरुव्यचस्** त्रि० उरु विचति व्यच–व्याजे (विशेषव्याप्तौ) असुन् अतिव्यापके । “ओरुव्यचाः पृणताम्” ऋ० ३,५०१ । “उरुव्यचाः प्रभूतव्याप्तिः” भा० । २विस्तीर्णे “उरुव्यचसे महिने” ऋ० ७,३१,११ । “उरुव्यचसा विस्तीर्णे” भा० । “शमदुरुव्यचा अदितिः” ५,४६,६ । “उरुव्यचसो धाम्ना पत्यमानाः” यजु० २७,१६,

**उरुषा** त्रि० उरु सनोति सन–विट् ङा वेदे षत्वम् । बहुदातरि “महीमस्मभ्यमुरुषामुरुज्रयः” ऋ० ५,४४, ६ । “उरुषां बहुदातारम्” भा० ।

**उरुष्य** रक्षणे पर० सक० सेट् । उरुष्यति औरुष्योत् । “उरुष्य राय एषो यजस्व” यजु० ७,४, अस्य व्याख्याने “उरुष्य रक्ष उरुष्यतीरक्षणकर्म्मा” वेददी० । “उरुष्यदग्निः पित्रोरुपस्थे” ऋ० ३,५,८ । अरुष्यत् रक्षतु” भा० । “गोपीथे न उरुष्यतम्” ऋ० ५,६५,६ ।